VIVEKANANDA VIDYABHAVAN R.K.S.M. LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2019

## SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं कस्यचिदेकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) महाकविवाणभट्टेन विरचितायां कादम्बर्य्यां शुकनासोपदेशम् अनुसृत्य लक्ष्म्याः चरित्रं निरूप्यताम्।

(ख) "वाणोच्छिष्टं जगत् सर्वम्"– वचनस्यास्य तात्पर्य्यं शुकनासोपदेशमाधारीकृत्य निरूपयत।

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम्। 5×3 = 15

(क) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः।

(ख) गङ्गेव वसुजनन्यपि तरङ्गवुद्बुदचञ्चला। दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः। पातालगुहेव तमोबहुला। हिडिम्बेव भीमसाहसैकहार्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति।

(ग) इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका।

(घ) सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम्, गुणवन्तमपवित्रमिव न स्पृशति, उदारसत्त्वममङ्गलमिव न बहु मन्यते, सुजनमनिमित्तमिव न पश्यति, अभिजातमहिमिव लङ्घयति, शूरं कण्टकमिव परिहरति।

(ङ) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्।

अथवा

अधोलिखितेषु विषयेषु यथेच्छं त्रयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×3 = 15

(क) गन्धर्वनगरलेखा, (ख) व्यसनम्, (ग) लक्ष्मीमदः, (ङ) मृगतृष्णिका,
(च) दर्पदाहज्वरोष्मा।

## SECTION-B

3. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) विहारभद्रः कः आसीत् ? अनन्तवर्माणं प्रति तस्योपदेशाः आलोचनीयाः।

(ख) ''दण्डिनः पदलालित्यम्'' इति विद्वद्वचनतात्पर्यं वैशद्येन विवृणुत।

4. यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः – 2×5 = 10

(क) विश्रुतचरितस्य मूलग्रन्थः कः ? ग्रन्थकारस्य नाम किम् ?

(ख) ''अधीष्व तावद्दण्डनीतिम्''– केन कमुद्दिश्य इदमुक्तम् ?

(ग) के तावत् षड्गुणाः ?

(घ) कति राजविद्याः ?

(ङ) ''हस्तप्रसारयन्नेवोत्तिष्ठति'' – केन कदा किमर्थं हस्तप्रसारणं कृतम् ?

(च) के तावद्राजानः रिपुषट्कं जेतुमसमर्थाः आसन् ?

(छ) ''राज्यं नाम शक्तित्रयायत्तम्''– केन एवं विचिन्तितम् ? शक्तित्रयञ्च किम् ?

## SECTION-C

5. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(क) सुबन्धुः, (ख) शुकसप्ततिः, (ग) पञ्चतन्त्रम्।

R.K.S.M. VIVEKANANDA VIDYABHAVAN * LIBRARY *

——×——

RK S.M VIVEKANANDA VIDYABHAVAN ★ LIBRARY ★

लक्ष्यं विकाशमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2019

## SANACOR04T-SANSKRIT (CC4)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः (20 अङ्काः)

1. अधोलिखितेषु एकः प्रश्नः समाधेयाः $10\times1=10$

(क) ज्ञानस्य स्वरूपं तथा ज्ञानार्जनस्य साधनानि श्रीमद्भगवद्गीतामाश्रित्य विचार्यताम्।

(ख) गुणस्वरूपं तथा गुणानां कार्याणि श्रीमद्भगवद्गीतायाः चतुर्दशाध्यायानुसारं लिख्यन्ताम्।

2. अधोविन्यस्तेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः $2\times5=10$

(क) 'इन्द्रियाणि' कतिविधानि ?

(ख) 'इन्द्रियाणि पराण्याहुः'– अत्र पराणि इति पदस्य कोऽर्थः ? कथमिन्द्रियाणि पराणि भवन्ति ?

(ग) 'ममैवांशो जीवलोक' इत्यत्र मम इति पदेन कस्योल्लेखः ? कस्तस्य अंशः ?

(घ) 'इन्द्रियाणि दशैकञ्च'– अत्र केषामिन्द्रियाणां ग्रहणम् ?

(ङ) 'एतत् क्षेत्रं समासेन सविकारमुदाहृतम्'– अत्र क्षेत्रं नाम किम् ?

(च) लोभप्रमादौ कुतः जायेते ?

(छ) कः योगारुढः उच्यते ?

(ज) मनः कानि इन्द्रियाणि आश्रित्य विषयानुपसेवते ?

### ख-विभागः (25 अङ्काः)

3. अधोलिखितेषु एकः प्रश्नः समाधेयः $10\times1=10$

(क) श्रीमद्भगवद्गीतानुसारं मनसः प्रकृतिः पर्यालोच्यताम्।

(ख) श्रीमद्भगवद्गीतायाः द्विवितीयेऽध्याये मनसः नियन्त्रणविषये यदुक्तं तत् समासेन आलोच्यताम्।

4. अधोनिबद्धेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागरलिप्या च व्याख्या कार्या – $5\times3=15$

(क) धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥

(ख) किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥

(ग) व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥

(घ) काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥

(ङ) श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥

R.K. S.M. VIVEKANANDA VIDYABHAVAN ★ LIBRARY ★

ग-विभागेः (05 अङ्काः)

5. अधोलिखितेषु <u>एकं</u> विषयमाश्रित्य संस्कृतेन देवनागरलिप्या च टीका लेख्या – 5×1 = 5

(क) प्रियः भक्तः।

(ख) श्रीमद्भगवद्गीता।

(ग) अचला श्रद्धा।

अथवा

अधोलिखितयो<u>रेकस्य</u> व्याख्या सुरगिरा देवनागरलिप्या च करणीया। 5×1 = 5

(क) यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः॥

(ख) ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥

——×——